संस्थापक-संपादक:
**स्व. डॉ. श्री. भा. वर्णेकर**

**वर्षम् ६५, अङ्काः ५२,५३,५४**
**शनि. दि. १२, १९, २६ मार्च २०१६, फाल्गुन शु. ४, ११ कृ. ३ शके १९३७, युगाब्द ५११७**

ISBN 978-0-00-000978-4
13 Digit ISBN : 978-1-890041-04-5
Barcode ISBN : 978-0-00-000978-4:18900

प्रबन्धिका
**डॉ. प्रज्ञा देशपाण्डे**
prabandhika.sanskbhavitavyam@gmail.com

प्रकाशक:
**डॉ. चन्द्रगुप्त वर्णेकर**
**०९३७०८०३९१३**
cswarnekar@gmail.com

संस्कृत-भवनम्,
२, पश्चिम: उच्च-न्यायालय-मार्ग:, नागपुरम् - ४४० ००१.

www.sanskritbps.org

# संस्कृत-भवितव्यम्

• निरन्तरं पञ्चषष्टिवर्षाणि प्रकाश्यमानं विश्वस्य एकमेव संस्कृतसाप्ताहिकम् •

**संस्कृत-भाषा-प्रचारि-सभायाः मुखपत्रम्**

अङ्क-मूल्यम् रु. ५/- वा. शु. : रु. २५०/- | PRINTED MATTER | वृत्तपत्र-पञ्जीयन-संख्या RN 11454/57

**Core Banking Facility :**
**Name :** Sanskrit Bhasha Pracharini Sabha
**A/c No. :** 30362855441
**IFSC/CIF Code :** SBIN0004872

डाकप्रेषण पञ्जीयनसंख्या NGP-27 Postage Licence No. 9

संपादिका
**डॉ. लीना रस्तोगी**

सहसंपादिकाद्वयम्
**डॉ. वीणा गानु, डॉ. शारदा गाडगे**

## होलिका गानम्



होलीं खेलति रघुवीरः अहाहा !
कस्य करे शोभते मृदङ्गः ?
कस्य करे शोभते तालौ ? ॥१॥
राम-करे शोभते मृदङ्गः
लक्ष्मणस्य च तालौ अहाहा ! ॥२॥

कस्य करे जलधारायन्त्रम् ?
कस्य करे वर्णचूर्णम् ? अहाहा ! ॥३॥
सीताकरे जलधारायन्त्रम्
भरतकरे वर्णचूर्णम्, अहाहा ! ॥४॥

• **डॉ. कृष्ण नारायण पाण्डेय**
सम्पादकः - 'प्रभातम्' संस्कृत-दैनिकम्, लखनौ (उ.प्र.)

**वार्ता:**

■ **डॉ. 'अभिराज' राजेन्द्रमिश्रवर्यैः** सह संस्कृतसाहित्य-चर्चा। मार्च मासे १३, १४, १५ दिनाङ्केषु नागपुरे समायोजिते षट्षष्ठितमे विश्व-हिन्दीसम्मेलने समामन्त्रिताः महाभागाः भौमवासरे १५ दिनाङ्के भवितव्यस्य कार्यालये संस्कृत-भवने लेखकैः सह साहित्यचर्चां संसाधितवन्तः। स्वकविताद्वयस्य गानमपि मिश्रवर्यैः प्रस्तुतम्।

■ **पलायते मलिनः मद्यसम्राटः माल्याविजयः -** नैकेभ्यः अधिकोशेभ्यः धनम् अपहृत्य विदेशगमनं कुर्वन् सांसदः रक्षाधिकारिणः गवेषणविषयः सञ्जातः।

■ **₹ ८७० कोट्याधीशः भुजबळः** महाराष्ट्रराज्यस्य पूर्वमन्त्री भ्रष्टाचार-प्रकरणे काराबद्धः भवति। 'नैतत् प्रतिशोधः प्रत्युत न्यायः' इति मुख्यमन्त्री।

■ **प्रथमग्रासे मक्षिकापातः!** न्यूझिलण्डसङ्घेन सह खेलन् भारतीयक्रिकेटचमूः नागपुरे प्रथमम् एव टी-ट्वेण्टीस्पर्धायां पराभूता।

## संस्कृत-भवितव्यस्य स्वामित्वस्य विशेषान्तरस्य च विषये निवेदनम्

**फॉर्म नं. ४ (रुल ८)**

| | |
|---|---|
| **१. प्रकाशनस्थलम्** | 'संस्कृतभवनम्' २,पश्चिम-उच्च-न्यायालय-मार्गः, नागपुरम् - ४४० ००१. |
| **२. प्रकाशनकालः** | प्रतिसप्ताहम् (शनिवासरे) |
| **३. मुद्रकस्य नाम** | श्री. कृष्णचन्द्र कढव |
| **राष्ट्रियता** | भारतीयः |
| **सङ्केतः** | लक्ष्मीनगरम्, नागपुरम् - ४४० ०२२. |
| **४. प्रकाशकस्य नाम** | डॉ. चन्द्रगुप्त श्री. वर्णेकरः |
| **राष्ट्रियता** | भारतीयः |
| **सङ्केतः** | ८१, अभ्यंकरनगरम्, नागपुरम् - ४४० ०१०. |
| **५. संपादकानां नामानि** | डॉ. नी. र. वऱ्हाडपांडे (२१ ऑगस्ट २०१५ पर्यन्तम्) |
| **राष्ट्रियता** | भारतीयः |
| **सङ्केतः** | ३८, हिंदुस्थान कॉलनी, नागपुरम् - ४४० ०३३. |
| **नाम** | डॉ. लीना रस्तोगी |
| **राष्ट्रियता** | भारतीया |
| **सङ्केतः** | ८६, माधवनगरम्, नागपुरम् - ४४० ०१०. |
| **नाम** | डॉ. वीणा गानु |
| **राष्ट्रियता** | भारतीयः |
| **सङ्केतः** | ३६, काछीपुरा, रामदासपेठ, नागपुरम् - ४४० ०१०. |
| **६. पत्रस्वामित्वम्** | संस्कृत-भाषा-प्रचारिणी-सभा, नागपुरम्. |

***डॉ. चं. श्री. वर्णेकरनामधेयः अहम् उद्घोषयामि यत् उपरि-लिखितं विवरणं मन्मतेन यथाज्ञानं, यथाश्रद्धं, यथार्थम् च इति।***

**'संस्कृतभवनम्'**
संस्कृत-भाषा-प्रचारिणी-सभा, नागपुरम् - ४४० ००१.

दि. १.३.२०१६ ***हस्ता. - चं. श्री. वर्णेकरः***

*तावदेव प्रतिष्ठा स्याद् भारतस्य महीतले।*
*ज्ञानामृतमयी यावत् सेव्यते सुरभारती॥*

सम्पादकीयम्

# होलिकापर्वणः का आवश्यकता साम्प्रतं भारते?

अस्मिन् सप्ताहे होलिकापर्व आमन्यते। फाल्गुन-पूर्णिमायां होलिकादहनम्, अपरेद्युः धूलिवन्दनम्, कृष्ण-पञ्चम्यां रङ्गोत्सवः इति उत्सवत्रयम् आहत्य होलिकापर्व, होलिकोत्सवः इत्युच्यते। दुर्गुणानां त्यागः, एकवारम् अभिव्यक्तिद्वारा मनसः दुर्भावनानां निष्कासनम्, मनसः शुद्धीकरणं च विविधरङ्गोद्धूलनेन आमोद-प्रमोदस्य आदान-प्रदानं इति अस्य पर्वणः स्वरूपम्। यथा गृहशोभार्थं स्वच्छीकरणं अवकरनिष्कासनम् अवकरदहनं तदनन्तरं रङ्गकर्म आदीनि कर्माणि क्रियन्ते तद्वदेव समाजगृहस्य मनोमन्दिरस्य शोभार्थं होलिकापर्व आयुज्यते।

## अकाण्डे होलिकादहनम्

सम्प्रति तु प्रकारान्तरेण होलिकादहनं दृश्यते। सततमनवरतजागरणाभियानानन्तरमपि अद्यापि वधूदहनवृत्तानि इतश्च ततश्च श्रूयन्ते एव। अचिरात् एव हरियाणा-गुजरात-राजस्थानसदृशेषु प्रान्तेषु एतादृश्यः घटनाः सञ्जाताः। आधुनिकतामार्गे तिष्ठते भारताय एताः घटनाः नैव भूषणास्पदाः। अपरश्च यदा तदा आवर्षं यत्रकुत्रचिद् स्थाने आन्दोलनं भवति। तस्मिन् बसयान-रेलयानमादिवस्तुरूपेण राष्ट्रस्यैव सम्पद् दह्यते, नश्यते च। अचिरादेव हरियाणाराज्ये घटिताः घटनाः तस्य उदाहरणम्।

## अवकरक्षेपणम्

प्रायः एवं दृश्यते यद्

*श्ववृत्तिव्यासङ्गो नियतमथ मिथ्याप्रलपनम्।*
*कुतर्केष्वभ्यासः सततपरपैशुन्यमननम्॥*

अनुदिनम् इत्येतादृशी परस्परनिन्दा राजकीय-सामाजिक-व्यासपीठेषु श्रूयते, श्राव्यते च। लोकतन्त्रे अभिव्यक्ति-स्वातन्त्र्यं, शासकपक्षस्य दोषदिग्दर्शनमित्यादि आवश्यकं वर्तते एव। सर्वजनहिताय तद् भवतु इति अपेक्ष्यते। परं, तत्सर्वं स्वार्थसाधनाय, अन्यचरित्रहननाय एव उपयुज्यते इति अनुभूयते। परस्परं तु निन्दन्ति एव अपि तु परुषभाषणैः, कुतर्कैः, सामाजिकं वातावरणम् अपि कलुषयन्ति। होलिकायाः करिदिने जनाः यथेष्टं गालिप्रदानं कुर्वन्ति परं राजनीत्यां सम्प्रति आवर्षं नैकानि करिदिनानि आमन्यन्ते, गालिभ्योऽपि असभ्यतरैः शब्दैः आरोपप्रत्यारोपाणां (आक्षेप) वर्षावैः प्रतिपक्षनेतॄन् ताडयन्ति एते जनाः। मिथ्या-प्रलपनाभ्यस्तः परपैशुनपारङ्गताः एते कुतर्कवादिनः न समयं गणयन्ति न स्थानं न च प्रसङ्गम्। घटनायाः गाम्भीर्यम् अवगणय्य शब्दानाम् अर्थान् अनर्थान् इति प्रस्तुवन्ति। घटनायाः मूलहेतुं विस्मारयितुम् इच्छन्तः एते जना प्रायः स्वकीये कपटव्यूहे यशस्विनः भवन्ति।

## मालिन्यप्रदर्शनम्

गालिप्रदानसमेतं मिथ्याप्रलपनेन, कलङ्कमिषेण च अवकरक्षेपणं कृत्वा नैव विरमन्ति एते। ननु तत् अपर्याप्तमिति मत्वा स्वान्तःमालिन्यप्रदर्शनरताः ते जनाः ईर्ष्याद्वेषासूयादिभिः भावनाभिः सामाजिकं वातावरणं प्रदूषयन्ति। दिग्जिलवत् भाषणं कर्तुं लज्जामपि नानुभवन्ति। मुखमस्तीति वक्तव्यमिति भावनया अभिव्यक्तिस्वातन्त्र्यस्य दुरुपयोगं कुर्वन्ति। सत्यं, न तेषां तालुपतनाद् भयं वर्तते। अतः येनकेनप्रकारेण प्रसिद्धिमिच्छन्तः ते पुरुषाः आरोप-प्रत्यारोपाणां कर्दमे मग्नाः तत्रैव रमन्ते।

## राजकीयवर्णसिञ्चनम्

युगपदेव हुताशनीपौर्णिमां, करिदिनं, रङ्गपञ्चमीमामन्य-मानाः समाजधुरीणः तदनुगन्तारः प्रसिद्धिपुरुषाश्च आवर्षं रङ्गसिञ्चने उद्युक्ताः भवन्ति। तमोगुणाधिक्यं कृष्णवर्णप्राबल्यं च दरीदृश्यते तेषाम् उद्यमे। राजकीयपक्षाणां सुन्दोपसुन्दीय-नाटकस्य प्रयोगाः दूरदर्शने दृश्यन्ते जनैः। परोत्कर्षमसहमानाः अन्यम् असहिष्णुं वदन्ति। अस्मिन् कार्यक्रमे देशविरोधस्य वर्णाधिकता कथं कदा च वर्धिता न ज्ञातं केनापि।

## अमर्यादपुरुषश्रेष्ठानां निःसीमाचरणम्।

उत्सवस्यापि प्रत्येकं काचिद् मर्यादा वर्तते। परं चित्रमेतत् यत् भारतवर्षे आमन्यमानस्य होलिकापर्वणः न आदिः स्मर्यते न वा अन्तः दृश्यते। हतबुद्धयः जनाः अगतिका भूत्वा तूष्णीं तिष्ठन्ति। अस्मिन् वातावरणे अपि आवश्यकं विशिष्टं होलिकापर्वं भारतवर्षे?

● डॉ. वीणा गानु

वार्ता

■ भवितव्यस्य लेखिका, संस्कृतभाषायाः प्राध्यापिका **डॉ. रेणुका करन्दीकर** सभायाः आजीवं सदस्यत्वं स्वीकृतवन्तः। वर्ष-प्रतिपत्तिथिः सा साप्ताहिकस्यास्य सह-सम्पादिका भविता इति स्वागतार्हं खलु।

## वन्दे राजस्थानम्!

सिकताभ्योऽपि समुद्यति तैलं यत्र स्वतः प्रमाणम् वन्दे राजस्थानम्॥

कनककपिशकिरणैर्वितरति ननु यस्मै रविः प्रभातम्
अमृतमयूखैर्विधिर्निशीथं कुरुते हिमावदातम्। वन्दे राजस्थानम्॥१॥

महिममण्डिता भारतधरणी यस्यैकस्य महिम्ना
स्वाभिमानगुरुगौरवभारं स्वदते हन्त गरिम्णा
सञ्जीवयति राष्ट्रं दत्वाऽक्षतमवदानम्। वन्दे राजस्थानम्॥२॥

नृपजननीगौरवमधिरोहति धात्री पन्नाबाई
नन्दसूनुविरहोन्मदगीतं गायति मीराबाई
निर्माणस्थलमितिहासानां मानवतामुद्यानम्। वन्दे राजस्थानम्॥३॥

धर्मधुरीणं नयप्रवीणं संस्कृतसंस्कृतिमूलम्
दानदयादाक्षिण्यसमन्वयशरणपयोनिधिकूलम्
यत्र भणति पुष्करमद्यावधि धातृमखोपाख्यानम्।
वन्दे राजस्थानम्॥४॥

मरुवणगोपितसलिलविग्रहा सरस्वती पौराणी
प्रतिष्ठिता जनमनसि वाङ्मयी कविताऽभूत्कल्याणी।
वन्दे राजस्थानम्॥५॥

● **डॉ. अभिराजराजेन्द्र मिश्रः**, पूर्वकुलपतिः, शिमला

## होलिकोत्सवे विडम्बनम्!

१) शतेषु जायते क्रूराः
सहस्रेषु च दाम्भिकाः
नेता दशसहस्रेषु
त्राता भवति वा न वा॥

२) न हि कश्चित् विजानाति
किं कस्य श्वो भविष्यति
अतोऽद्य करणीयानि
श्वः करिष्यति बुद्धिमान्॥

३) क्षणशः कणशः चैव भ्रष्टाचारं च साधयेत्।
क्षणो योगे भवेन्नेता गुणो योगे भवेद् वणिक्॥

४) क्षणशः कणश्चैव विद्यामर्थं च साधयेत्।
साधयित्वा हि तत् सर्वं, स्वार्थाय परियोजयेत्॥

५) यथा शुल्कं तथा शाला
यथा शाला तथा फलम्।
यथा फलं तथा वृत्तिः
यथा वृत्तिस्तथा धनम्॥

६) बालो वा यदि वा वृद्धो युवा वा गृहमागतः
तस्य पृच्छा यथा कुर्यात् पुनरेतुं न शक्यते॥

● **डॉ. सौ. प्रज्ञा देशपाण्डे**

वार्ता:

### ■ डॉ. भीमराव-अम्बेडकराणां सपादशताब्दपर्वणि कालिदास-संस्कृतविद्यापीठे अध्ययनपरम्परायाः अनुसरणम्।

महाराष्ट्रशासनस्य आदेशमनुसृत्य शताधिकाः छात्राः अष्टादशघण्टां यावत् वाचनालये एव उपविश्य पुस्तकपठनं कृतवन्तः शुक्रवासरे एकादशमार्च-दिनाङ्के। वैशिष्ट्य-पूर्णोऽयम् उपक्रमः सर्वत्र चर्चा-विषयः सञ्जातः; यतोहि क्षीयमाणायां पुस्तक-पठनपरम्परायां शिशिरे कमलवत् सः विराजते। अभिनन्दनार्थं विद्यापीठस्य वाचनालयचमूः!

*होलिकोत्सवे विनोद-कणिका!*

## असाक्षात्कारः!

द्वादश-कक्षायाः अन्तिमा परीक्षा प्रारब्धा। गणुरायः कश्चित् परीक्षार्थी।

परीक्षागृहे प्रश्न-पत्रिकाणां वितरणं समाप्तम्। परीक्षार्थिनः लेखनं प्रारभन्ते।

गणुरायः प्रतिलिपिकरणं (कॉपी इति आङ्ग्ल-भाषायां) कर्तुम् इच्छति। तथापि पर्यवेक्षकः परीक्षागृहे ततिषु निरन्तरं सञ्चरति। अतः प्रतिलिपि-करणं न शक्यप्रायम्।

अस्वस्थः गणुरायः एकं लघुकर्गजखण्डं गृह्णाति। कर्गजखण्डे सः किञ्चित् लिखति। लिखितं खण्डं वेष्टितं करोति। वेष्टनं पर्यवेक्षकाय यच्छति।

पर्यवेक्षकः खण्डमुद्घाट्य लेखनं पठति। पठित्वा सः शीघ्रम् अग्रे गच्छति। आसन्दे उपविशति। एकदा उपविष्टः नैव उत्तिष्ठति।

गणुरायस्य कार्यभागः सुलभः भवति। पर्यवेक्षकस्य सञ्चरणं समाप्तम्। प्रतिलिपिकरणं सुशक्यम्।

किं लिखितम् आसीत् गणुरायेण कर्गजखण्डे?

''महोदय! भवतः अधोवस्त्रविशेषं पार्श्वभागे छिन्नं वर्तते।'' इति।

● **म. वि. कोल्हटकरः**, सातारानगरम्

वार्ताः

■ **स्वच्छता-अभियानम्।** विदर्भे यवतमाळनगरे 'दीनदयाल-बहुउद्देशीय-प्रसारक-मण्डलम्' नामिकया संस्थया चालितः छात्रावासः अस्ति। तत्र केचन दलित-पारधीसमाजस्य बालकाः निवसन्ति। पूर्वं यदा ते छात्रावासं प्राप्ताः तदा ते मराठी-भाषाम् अपि सम्यक्तया वक्तुम् असमर्थाः आसन्। जानेवारीमासे छात्रावासस्य पालकसभायां तैः एकः संस्कृत-नाट्यांशः अभिनीतः। अष्टमकक्षायाः पाठ्यपुस्तके 'स्वच्छता अभियानं' नामा नाट्यसंवादः अस्ति। तदेव नाट्यम् एतैः बालकैः अभिनीतम्। एषः उपक्रमः सर्वैः अभिनन्दितः। श्रीमती मधुरा वेळूकर महोदया तस्य दिग्दर्शनम् अकरोत्। श्रीमती भाग्यश्री बापट तस्याः साहाय्यकारिणी शिक्षिका आसीत्। छात्रावासस्य सञ्चालकाः छात्रनटाः, शिक्षिकाद्वयं च सर्वे अभिनन्दनार्हाः। **- दुर्गा पारखी**

■ **विश्व-क्रिकेट-स्पर्धायां विजयात् पूर्वम् आशिया-खण्डविजयः!** ऐषमः बाङ्ग्लादेशे टी-ट्वेण्टी-स्पर्धायां पराभवं विना चषकं विजित्य आहत्य अधिकतमवारं (षड्वारं) विजयिनी भवति भारतीयक्रिकेटचमूः। धोनीमहेन्द्रसिंहस्य नेतृत्वे अद्ययावत् १२ टेस्टस्पर्धासु २२ एकदिवसीयासु, ९ टी-ट्वेण्टी स्पर्धासु भारतेन विजयः अधिगतो वर्तते।

■ **कार्तिकेयेनापि 'कीर्तिमान्' चिदम्बरः!** पूर्ववित्त-मन्त्रिणः पुत्रः भ्रष्टाचारप्रकरणे विदेशेषु कृष्णधनविनिमयविषये च दोषारोपी भवति।

■ **जवाहरविश्वविद्यालयप्रकरणे** कन्हैयाम् आह्वयति जाह्नवी पञ्चदशवर्षीया पञ्चनदपुत्री लुधियानावासिनी।

■ **या नारी राष्ट्र-पुरुषेषु शक्तिरूपेण संस्थिता! -** महिलादिवसस्य पूर्वं रविवासरे ६ मार्चदिनाङ्के लोकसभायाः केन्द्रसभागृहे महिलालोकप्रतिनिधिं सम्बोध्य प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् स्वयमेव सशक्तीकरणं कर्तुं समर्थाः सन्ति स्त्रियः। सम्प्रति देशे प्रायः विविधेषु जनप्रतिनिधिषु एकतृतीयांशस्थानेषु महिलाः विद्यन्ते।

■ **पञ्चसु राज्येषु निर्वाचनम्** असम (१२६), वङ्ग (२९४), पुदुचेरी (३०), तामिलनाडु (२३४), केरल (१४०) प्रान्तेषु आहत्य ७८४ विधानसभाक्षेत्रेषु ४ एप्रीलतः १६ मेपर्यन्तं भविता। परिणामाः १९ मे दिनाङ्के उद्घोषयिष्यन्ते।

■ **देहुतीर्थे सन्तसमागमः** सज्जनभूमिः खलु महाराष्ट्र-देशः। तस्मिन् निवृत्तिनाथः, ज्ञानेश्वरः, एकनाथः, तुकारामः, रामदासः, नामदेवः, जनाबाई, मुक्ताबाई सदृशी अक्षुण्णा सन्तपरम्परा विराजते। तुकाराममहाराजस्य तीर्थक्षेत्रे देहूनगरे शुक्रवासरे १८ मार्चदिनाङ्के रामदासस्वामिनः मूर्तेः प्राणप्रतिष्ठाः भक्तनिवासस्य च समुद्घाटनम् आचार्याणां **गोविन्दगिरि-वर्याणां** प्रमुखोपस्थितौ **सरसङ्घचालकाणां डॉ. मोहन-भागवतानां** करकमलाभ्यां भवितारौ।

# आयोजिता कार्यशाला

(वृत्तप्रेषकः : डॉ प्रफुल्लपटेलः, बडोदरा)। देवसायुज्य-संस्कृत-प्रतिष्ठानेन दशमकक्ष्यायाः संस्कृतच्छात्राणां कृते १४.२.२०१६ तमे दिनाङ्के प्रातः एकादशवादनतः सायं पञ्चवादन-पर्यन्तं कार्यशालायाः आयोजनं कृतमासीत्। आयोजितायां कार्यशालायां छात्रेभ्यः परीक्षापयोगिमार्गदर्शनं तथा व्याकरणस्य अंशान् पाठितवन्तः यथा - सन्धिः, समासः कृदन्त-क्त्वा/ल्यबादीनां प्रयोगः, गद्य-पद्ययोः अनुवादः, वाक्यनिर्माणम्, सुभाषितानाम् अर्थविस्तारः, नाट्यखण्डानाम् अनुवादश्च। कार्य-शालायां श्रीहसमुखजाधवः, डॉ. घनश्यामभोनवीया तथा डॉ. प्रफुल्लपुरोहितः मार्गदर्शनम् अकुर्वन्। कार्यशालायाम् अंग्रेजी-माध्यमस्य विविध-विद्यालयानां ४५ छात्राः सोत्साहेन भागं गृहीतवन्तः। समारोहे अभिभावकाः कार्यशालायाः विषये अवदन् यद् अंग्रेजी-माध्यमस्य संस्कृतच्छात्राणां कृते कार्यशाला उत्तमाऽस्ति। प्रतिवर्षं कार्यशालायाः आयोजनं भवेत्। देवसायुज्यसंस्कृतप्रतिष्ठानस्य प्रशंसनीयः प्रयासो वर्तते। डॉ. प्रफुल्लपुरोहितेन छात्रेभ्यः अभिभावकेभ्यः तथा अध्यापकेभ्यः कृतज्ञता प्रकटिता। कार्यशालायाः प्रारम्भः सरस्वतीप्रार्थनया तथा च समारोहः शान्तिमन्त्रेण अभवत्।

---------

# द्विदिवसीयसमाजोपयोगि-विशिष्टव्याख्यानमाला

(वृत्तप्रेषकः : डॉ प्रफुल्लपटेलः, बडोदरा)। देवसायुज्य-संस्कृत-प्रतिष्ठानेन श्रीअरोबिन्दोसभागारे द्विदिवसीयविशिष्ट-व्याख्यानमाला फरवरीमासस्य १८-१९ दिनाङ्कयोः समायोजिता आसीत्। अस्यां व्याख्यानमालायां विविधविषयेषु व्याख्यानानि अभवन् यत्र मुख्यवक्तारः आसन् - श्रीदेवलशास्त्री, श्रीकनुभाई पुरोहितः, श्रीहसमुखः जाधवः, श्रीमती धाराजोषी चेत्यादयः आसन्। द्विदिवसीयविशिष्ट-व्याख्यानमालायाः उद्घाटन-समारोहे अध्यक्षत्वेन प्रो. प्रदीप-सिंहचूण्डावतमहोदयः (संकाया-ध्यक्षः, फॅकल्टी ऑफ आर्टस्, बडौदासंस्कृतमहाविद्यालयः) आसीत्। प्रो. प्रदीपसिंहमहोदयः उक्तवान् यत् संस्कृतेन एव भारतस्य उन्नतिः इति। औद्घाटनिकं सत्रं वैदिकमङ्गलगीत्या आरब्धम्। मञ्चस्थैः अतिथिभिः, देवसायुज्यसंस्कृतप्रतिष्ठानाधिकारिभिश्च मङ्गलदीपप्रज्वालना-नन्तरं भगवत्यै सरस्वत्यै कुसुमाञ्जलयः समर्पिताः।

मञ्चाधिष्ठितानामतिथीनां सत्कारानन्तरं देवसायुज्य-संस्कृतप्रतिष्ठानस्य डॉ. प्रफुल्लपुरोहितेन स्वागताभिनन्दनं समाचरता व्याख्यानमालायाः, तथा देवसायुज्यसंस्कृत-प्रतिष्ठानस्य विवरणं सङ्क्षेपेण समुपस्थापितम्। कार्यक्रमस्यान्ते डॉ. दीपेन्द्रसिंहेन धन्यवादज्ञापनं विहितम्।

## पाटणनगरे ऐषम: श्रीहेमचन्द्र-समारोह: सम्पन्न:

वार्ता:

गुजरातप्रदेशस्य ऐतिहासिके पाटणनगरे मार्चमासस्य पञ्च-षड्-सप्ततमासु तिथिषु श्रीहेमचन्द्र-समारोह: सोल्लासम् सम्पन्न:; यस्मिन् आचार्यस्य विविधान् ग्रन्थान् अधिकृत्यैका अखिलभारतीया सङ्गोष्ठी सम्पन्ना। अस्यां गोष्ठ्याम् काशी-हिन्दू-विश्वविद्यालयत: तत्रभवन्त: प्रा. डॉ. श्रीसदाशिवकुमार-द्विवेदिन:, आई.आई.टी. मुम्बापुरीत: प्र. डॉ. श्रीमल्हार-कुलकर्णीमहोदया: च सारस्वतातिथिरूपेण समुपस्थिता:। डॉ. श्रीसदाशिवकुमार-द्विवेदिमहोदयै: हेमचन्द्रस्य काव्यानुशासन-मधिकृत्य तत्रस्थिता: सिद्धान्ता: विवृता:। तेषु यत् मौलिकं चिन्तनं दृश्यते, तत्सर्वं सूक्ष्मेक्षिकया सरलया संस्कृतभाषया समुद्घाटितम्। एवं डॉ. सदाशिवकुमारै: प्रथमं स्वकीयं बीजभूतं व्याख्यानं प्रदत्तम्। तदनन्तरं मुम्बईत: समागता: डॉ. कुलकर्णिमहोदया: हेमचन्द्रस्य सिद्धहेम-शब्दानुशासनस्य पाणिनेश्चाष्टाध्याय्या च समग्राया: विषयव्यवस्थाया: तुलनात्मकं मूल्याङ्कनं संस्कृतमाश्रित्य प्रस्तुतवन्त:। प्रो. श्रीमणिभाई-प्रजापति-व्याख्यानं प्रदानाय डॉ. कुलकर्णी-महोदया: समाहूता:, तै: सङ्गणक-यन्त्रेण कथं भारतीयभाषाणामनुवादं कर्तुं शक्यते, एवमेव, तत्र संस्कृतव्याकरणशास्त्रं कथमुपयुक्तं भवेदिति सोदाहरणं प्रदर्शितम्।

अस्मिन् राष्ट्रियपरिसंवादे स्वर्गीय-प्रा. श्रीतपस्वी-नान्दी-स्मृतिव्याख्यानमपि समायोजितमासीत्। डॉ. वसन्त-कुमार-भट्टेन अभिज्ञानशाकुन्तलस्य पञ्च-रङ्गावृत्तय: इति विषयमवलम्ब्य तत् व्याख्यानं प्रदत्तम्। तैरुक्तं यत् काश्मीरी-मैथिली-बंगाली-दाक्षिणात्य-देवनागरीत्यादि वाचनापञ्चकं वस्तुतस्तु रङ्गकर्मिणां मञ्चोपरि विहितानां परिवर्तनानामेव विलासवैविध्यं प्रकटीकरोति। अस्य नाटकस्य सर्वेषां पद्यानां विश्लेषणमप्यत्रेदं-प्रथमतया समुपस्थापितम्। येन ज्ञायते यत् सत्स्वपि बहुविधेषु परिवर्तनेषु केन कारणेन नाटकस्यास्याकर्षणम् अक्षुण्णं वरीवर्तते। एतच्च व्याख्यानं पुस्तिकारूपेणापि प्रकाशितम् वर्तते।

अस्यां गोष्ठ्यां सार्धद्विशतसंख्याका: शोधलेखा: प्रस्तुता:। गतवर्षीयाणां च शोधलेखानां सङ्कलनं कृत्वा, तेषां समेषां हैम-प्रपाख्यायां पत्रिकायां प्रकाशनमपि अस्मिन् वर्षे संस्कृतविभागेन विहितम्। अस्य हेमचन्द्रसमारोहस्य पञ्चदशपूर्वेभ्यो प्राक् प्रवर्तनम् कृतमासीत्, तच्च नैरन्तर्येण अद्यापि प्रतिवर्षं प्रचलतितराम्।

प्रसङ्गेऽस्मिन् सर्वै: प्रतिनिधिभि: संस्कृताध्यापकै: हेमचन्द्र-जैन-ज्ञान-मन्दिरं गत्वा प्राचीना: महत्त्वपूर्णा: हस्त-लिखिता: ग्रन्था: अवलोकिता:। सकलस्यापि समारोहस्य प्रो. देवसिंह राठवा-महोदय:, प्रो. दिलीपकुमार पटेल-महोदय:, डॉ. सनतकुमार जोशी-महोदयश्च सम्मिल्य सुचारुरूपेण संचालन-मुपसंहरणञ्च कृतवन्त:।

## सभा-सदस्या सभाजिता!

**उत्तराखण्ड-संस्कृत-अकादम्या** आयोजितानाम् अखिल-भारतीय नाट्यलेखन-लघुकथा-समस्यापूर्तिप्रतियोगितानां पुरस्कारवितरणस्य समारोह: ४ मार्च २०१६ तमे दिनाङ्के ज्वालापुरस्थिते अकादम्या: 'संस्कृत-भवने' सम्पन्नोऽभवत्। कार्यक्रमेऽस्मिन् कांगडी विश्वविद्यालयस्य (हरिद्वार) कुलपति: **प्रो. सुरेन्द्रकुमार:** प्रमुखातिथिरूपेण, **डॉ. वाचस्पति मैठाणी** (बालिका संस्कृत महाविद्यालय:, सेंदूल) अध्यक्षत्वेन, व्याकरणाचार्य: **डॉ. भोला झा** (प्राचार्य: आदर्श संस्कृत महाविद्यालय: हरिद्वार) तथा संस्कृत अकादम्या: सचिव: **डॉ. बहुगुणा** चैते मान्यवरा: मञ्चे विराजिता: आसन्। कार्यक्रमेऽस्मिन् 'संस्कृत लघुकथा' प्रतियोगितायां नागपुरस्था (महाराष्ट्रे) **डॉ. विजया रामचन्द्र जोशी प्रथम क्रमाङ्कस्य पुरस्कारेण सम्मानिता।**

अभिनन्दनम् डॉ. विजया रामचन्द्र जोशी महोदयाया:!

---

## आकाशवाण्यां प्रतिमासं द्विवारं ''संस्कृतसौरभम्''

''भारतस्य महामहिमशालिना राष्ट्रपतिना प्रमाण-पत्रप्रदानेन सभाजितेषु संस्कृत-विद्वत्सु अन्यतमेन आचार्येण **हरिदत्त-शर्मणा** साकं **'संस्कृत-सौरभम्'**-इति आकाशवाण्या: कार्यक्रमार्थं साक्षात्सम्भाषणं ध्वन्यङ्कितम्। अवसरेस्मिन् कार्यक्रम-सञ्चालकेन डॉ. बलदेवानन्द-सागरेण पृष्ट: आचार्य-शर्मा स्वीयान् विविधान् अध्यापनानुभवान् विवर्णयन् स्वीय-वैदेशिक-यात्राविषयेऽपि विस्तरेण सूचितवान्। तेनोक्तं यत् संस्कृत-शिक्षणार्थं तेन नैकवारं अनेकेषां देशानां यात्रा विहिता। तदवसरे तेन अनुभूतं यत् अनेकेषु देशेषु प्रतिष्ठापितै: संस्कृत-पीठै: संस्कृत-विषयकं बहुविधं शोधकार्यम् अनुष्ठीयते। प्रो. शेल्डोन-पोलोक-विषये पृष्ट: डॉ. शर्मा न्यगादीत् यत् अमुना वैदेशिक-विदुषा नैकत्र संस्कृत-ज्ञानस्य वैदिक-मनीषायाश्च विद्रूपीकरणं विहितम्। तच्च नैवास्ति समीचीनम्। भारतीयै: विद्वद्भि: स्वीय-रचनात्मक-प्रतिभया तत् सर्वं सम्यक्तया सम्पादनीयमवशिष्यते। आचार्य-शर्मणा स्वीय-काव्यपाठेन सहृदयानां परितोषार्थं काव्यरस-परिवेषणम् च अनुष्ठितम्। प्रतिमासं द्विवारं (प्रथमे तृतीये च शनिवासरे) रात्रौ सार्धनववादने आकाशवाण्या: इन्द्रप्रस्थ-वाहिनीत: (666 KHz त:) प्रसार्यमाणोऽयं कार्यक्रम: एप्रिल-मासे द्वितीय-दिनाङ्के (शनिवासरे) श्रोतुं शक्यते।

● प्रेषक: - **बलदेवानन्द-सागर:**

कथा

# वराकः दिनेशः

पुस्तकस्यूतं गृहीत्वा दिनेशः पाठशालां प्रस्थितः। दशवर्षदेशीयः असौ चतुर्थ-कक्षायाः छात्रः आसीत्। तस्य विद्यालयः गृहात् दूरे आसीत्। वाहनव्ययं कर्तुं पर्याप्तं धनं तस्य परिवारे नासीत्। अतः सः प्रतिदिनं पद्भ्यामेव पाठशालां गच्छति स्म। तस्य पिता कस्मिन्नपि आपणे कर्मचारी। मातापि अन्येषां गृहे पाकादि-कार्याणि कृत्वा किञ्चित् धनम् अर्जयति स्म। दिनेशस्य उज्ज्वलं भवितव्यम् इत्येव तयोः लक्ष्यमासीत्। कृष्णवर्णीयः, राजीवनेत्रः, कृशशरीरः, मृदुभाषी, विनयशीलः दिनेशः अध्ययने महतीं रुचिं धारयति स्म। सः अतीव आज्ञापालकः, कार्यतत्परः, भावशीलश्च आसीत्।

सार्ध-एकादशवादनसमये दिनेशः शालां प्राप्तः। नित्यक्रमानुसारं शालाकार्यं प्रारब्धम्। माध्याह्ने मुख्याध्यापकमहोदयः दिनेशस्य वर्गम् आगतवान्। सः सूचितवान् ''यूयं सर्वे चतुर्थवर्गस्य छात्राः। अस्माकं विद्यालयेन अनाथच्छात्रानाम् कृते धनं दातव्यम्। अतः युष्माभिः सर्वैः प्रतिगृहं गत्वा धनं सङ्गृह्य शिक्षकेभ्यः दातव्यम्। यः अधिकं धनं सङ्गृह्णीयात् तस्मै अहं पारितोषिकं दास्यामि'' इति। अनन्तरं वर्गशिक्षकेण सर्वेभ्यः केचन कर्गजाः प्रदत्ताः दातॄणां नामानि रूप्यकसंख्यां च लिखितुम्।

शालाकार्ये समाप्ते दिनेशः गृहम् आगतवान्। नित्यक्रमानुसारं तस्य पितरौ स्वकार्यार्थं गतौ आस्ताम्। मात्रा सिद्धं प्रत्याशं भक्षयित्वा दिनेशः शिक्षकस्य आदेशानुसारं धनसङ्ग्रहार्थं प्रस्थितः। पद्भ्यां चलन् सः गृहात् दूरम् आगतवान्। प्रत्येकं गृहं गत्वा धनं याचनीयं इति विचिन्त्य सः गृहात् गृहम् अहिण्डत। पञ्च-षड् गृहेषु तेन पञ्चदश वा रूप्यकाणि प्राप्तानि। आहत्य चत्वारिंशत् रूप्यकाणि तेन प्राप्तानि। आनन्दितः सः महता उत्साहेन अन्यत् गृहम् आगच्छत्। प्रवेशद्वारम् उद्घाट्य अङ्गणं गत्वा सः द्वारघण्टिकां वादयितुम् ऐच्छत्। तदा एव कुतश्चित् कश्चित् बृहद्कायः शुनकः धावन्नेव तस्य समीपम् आगतवान्। तस्य आक्रमणेन भयाकुलः दिनेशः पलायितुम् अपि अक्षमः आसीत्। शुनकस्य पश्चात् कोपि पुरुषः तत्र आगत्य उच्चैः अगर्जत् ''कोऽसि रे त्वम्? किं करोषि अत्र? किं चोरयितुम् आगतोसि? अपसर नो चेत् ...'' इति उक्त्वा सः मनुष्यः ''चोरः चोरः'' इति उच्चैः गर्जन् तं ताडयितुम् आरब्धवान्। ''आर्य, आर्य, नाऽहं चोरः'' इति वदन् दिनेशः तं विद्यालयस्य पत्रं दर्शयितुम् ऐच्छत्। तदा एव प्रतिवेशि-गृहात् युवकद्वयं तत्र प्राप्तम्। किं चोरितम् अनेन इति उक्त्वा ताभ्याम् अपि ताडनम् आरब्धम्। असहायः दिनेशः साहाय्यार्थम् उच्चैः आक्रोशत्। मार्गे गच्छन्तः जनाः प्रवेशद्वारे सम्मिलिताः। किन्तु न कोपि तस्य साहाय्यार्थम् अग्रे आगच्छत्। अपि तु, ''ताडयतु ताडयतु चोरः एव दृश्यते एष, बाल्ये एव इयम् अपराधवृत्तिः। अग्रे किं करिष्यति इति भगवान् एव जानीयात्। चलन्तु एनम् आरक्षकं प्रति नेष्यामः'' इति उक्त्वा केनचित् मनुष्येण दिनेशस्य हस्तः बलात् गृहीतः। भीत्या, कम्पमानः, साश्रुनयनः, असहायः दिनेशः तेन बलाद् एव आकृष्य आरक्षक-केन्द्रं प्रति नीतः। आरक्षककार्यालयस्य समीपे आगते दिनेशस्य भीतिः शतगुणिता अभवत्। तातः अम्बा च मां प्रतीक्षमाणौ किं करिष्यतः इति विचारेण तस्य सर्वा शक्तिः अपगता। तदा एव तेन मार्गेण गच्छन्ती तस्य विद्यालयस्य शिक्षिका तेन दृष्टा। तस्याम् अपि अवस्थायां सर्वां शक्तिम् एकत्रीकृत्य सः ताम् आह्वयत्। ''आर्ये, आर्ये, माम् रक्षतु। अहं दिनेशः चतुर्थ वर्गस्य छात्रः। तस्य वचः श्रुत्वा, सा अध्यापिका तस्य समीपं आगत्य तं बलात् आकर्षतं पुरुषम् अपृच्छत्, ''किमभवत्?'' तदा सः उक्तवान्, ''एष भवत्याः छात्रः चोरः अस्ति। तम् आरक्षकं प्रति नयामि। अस्य कृते तदेव स्थानं योग्यम्। सा शिक्षिका दिनेशं सम्यक् जानाति स्म। सा दिनेशम् अपृच्छत्, ''वत्स, अपि एतत् सत्यम्?'' हस्ताभ्याम् अश्रूणि प्रमार्ज्य अवरुद्धकण्ठः दिनेशः तां सर्वम् अकथयत्। तस्मिन्नवसरे मार्गे भ्रमन्तः अन्येपि जनाः तत्र एकत्रिताः। तस्य कोषात् विद्यालयस्य पत्रम् उद्धृत्य सा शिक्षिका उच्चैः अवदत् ''भोः जनाः किं भवद्भिः कृतम्? एष निष्पापः बालकः युष्माभिः चोरः इति मत्वा ताडितः। अनाथालयस्य कृते धनं सङ्कलयन्ति अस्माकं विद्यालयस्य छात्राः। पश्यन्तु एतद् परिचयपत्रम्। अस्माकं गुणवान् छात्रः अस्ति एषः। अस्य ताडनार्थं यूयं सर्वे दण्डनीयाः। चलन्तु मया सह। अहं युष्मान् आरक्षककार्यालयं नयामि। चलतु चलतु।'' तस्याः आवेशं दृष्ट्वा सत्यं च ज्ञात्वा ते ताडकाः भीताः। ते सर्वे वारं वारं क्षमायाचनाम् अकुर्वन्। तदा सा शिक्षिका तान् शब्दैः भूरि अताडयत्। अनन्तरं सा दिनेशं तस्य गृहं प्रापयत्। तस्य मातरं सर्वं वृत्तं च अकथयत्। मातरम् आलिङ्ग्य उच्चैः रुदन् वराकः दिनेशः ''कः तस्य अपराधः'' इति मनागपि न ज्ञातवान्।

— डॉ. सौ. शारदा गाडगे

---

पाठकस्य पत्रम्

सम्पादकवर्याः!

लेखितुं न शक्नोमि, यत् भवतः **संस्कृत-भवितव्यम्** प्राप्य कथं हर्षम् अनुभवामि। नैके धन्यवादाः।

इति भवदीयः

**प्रा. डॉ. हिमांशुः पोटा**

(ऑस्ट्रेलियादेशात् गणपत्रेण)

श्रीरामजन्म-प्रसङ्गे

# सीता-अनसूया-संवादस्य महत्त्वम्

सुविदितमेव यत् संस्कृतवाङ्मयम् अतिप्राचीनं विपुलतमश्च वर्तते। मनुष्यस्य सर्वाङ्गीणविकासस्य साधनमिदम् सर्वव्यापकं धर्मनिष्ठं तथा च संस्कृतेः प्रधानवाहनश्चास्ति। अस्मिन् संस्कृत-साहित्ये समाजहितपरकचिन्तनं यत्र-तत्र कृतं दृश्यते। कृतभूरिपरिश्रमाः संस्कृतस्य क्रान्तदर्शिनः कवयः समाजे यथेच्छं विचरणं कृत्वा समाजहिताय स्व-स्वकाव्येषु विचारान् प्रतिपादितवन्तः। अस्मिन् जगति यानि तत्त्वानि वा वस्तूनि वा वयं पश्यामः तानि वर्गत्रये स्थापयितुं शक्नुमः। तत्र प्रथमः दार्शनिकवर्गः, अस्मिन् वर्गे ईश्वरः, जीवः, माया एतादृशाः चिन्तनविषयाः भवन्ति। द्वितीयः वर्गः विज्ञानवर्गः, अस्मिन् वर्गे द्रव्यगुणकर्मादि विषयाः भवन्ति तथैव तृतीयो भवति सामाजिकः वर्गः। अस्मिन् वर्गे विविधसामाजिकमूल्यानां समावेशः भवति।

यदि कोऽपि सर्वेषामपि सामाजिकमूल्यानां दर्शनं, पठनं, धारणं वा एकस्मिन्नेव स्थले कर्तुं वाञ्छति नास्ति रामायणातिरिक्तः अन्यः कोऽपि ग्रन्थः। समस्ते जगति रामायणमादिकाव्यत्वेनार्षकाव्यत्वेन च राजते। रामायणं भारतवर्षस्यैकं सर्वोत्कृष्टं धार्मिकं, नैतिकं सामाजिकमैतिहासिकं काव्यं वर्तते। इदमादिकविना महर्षिणा वाल्मीकिना विरचितं भारतीयसमृद्धसाहित्यस्य महाकाव्यमस्ति। अस्मिन् सनातनवैदिकधर्मस्य भारतीयसंस्कृतेः च आदर्श-मर्यादापुरुषोत्तमस्य भगवतः श्रीरामस्य समग्रमपि जीवनं काव्यरूपेण वर्णितं वर्तते। अस्मिन् आदिकाव्ये भारतीयसंस्कृतेः यावद् विशालरूपमुपलभ्यते तावदन्यत्र दुर्लभम्। अत्र केवलं रामरावणयोर्युद्धस्यैवं तयोः विजय-पराजययोः एवं वर्णनं नास्ति अपितु सामाजिकराष्ट्रियैकतायाः अपि एकमादर्शरूपं वर्तते।

''रामायणम्'' शब्दः ''राम+अयनम्'' इति शब्दद्वयस्य सामासिक-योगेन सिद्ध्यति। अस्य मूलार्थः रामस्य अयनम् अर्थात् रामेण प्रदर्शितम् अयनम् अर्थात् मार्गः वा पन्था वा।

रामायणमहाकाव्यस्य सम्पूर्णा कथा - बालकाण्ड - अयोध्याकाण्ड - अरण्यकाण्ड - किष्किन्धाकाण्ड - सुन्दरकाण्ड - युद्धकाण्ड - उत्तरकाण्ड नामधेयेषु सप्तकाण्डेषु विभक्ता वर्तते। एतेषु सप्तकाण्डेषु अयोध्याकाण्डे सप्तदशाधिकशततमे सर्गे वर्तते सीता-अनसूया संवादः। यदा रामः पितुराज्ञां परिपालयितुं लक्ष्मणेन सीतया च सह वनं याति तदानीं प्रप्रथमम् अत्रिमुनेः आश्रमं गच्छति। तत्राश्रमे सीता अनसूयया सह मिलति, तयोश्च सम्भाषणं जायते। एषः एव सीता-अनसूया-संवादः इति सुविख्यातः समाजे।

वस्तुतः सीता-अनसूया-संवादः न तु सामान्यसंवादः अपि तु चतुर्षु अपि आश्रमेषु श्रेष्ठतमस्य गृहस्थाश्रमस्याधारस्तम्भः। गृहस्थाश्रमः तु सम्पूर्णमानवजीवनस्य मेरुदण्डः। अस्य संवादस्य श्रेष्ठत्वमितोपि एकेन कारणेन वर्धते यत् अस्मिन् संवादे या उपदेशकर्त्री वर्तते सास्ति महासती अनसूया। यस्याः परिचयं कारयन् ऋषिः अत्रिः श्रीरामं वदति -

**रामाय चाचक्षेतां तापसीं धर्मचारिणीम्।**
**दश वर्षाण्यनावृष्ट्या दग्धे लोके निरन्तरम्॥**
**यया मूलफले सृष्टे जाह्नवी च प्रवर्तिता।**
**उग्रेण तपसा युक्ता नियमैश्चाप्यलङ्कृता॥**
**दशवर्षसहस्राणि यया तप्तं महत् तपः।**
**अनसूयाव्रतैस्तात प्रत्यूहाश्च निर्वर्हिताः॥**
**देवकार्यनिमित्तं च यया सत्वरमणया।**
**दशरात्रं कृता रात्रिः सेयं मातेव तेऽनघ॥**
**तामिमां सर्वभूतानां नमस्कार्यां तपस्विनीम्।**
**अभिगच्छतु वैदेही वृद्धामक्रोधनां सदा॥**

(रा. अयोध्या. ११७, ९-३३ श्लोकाः)

तथा च या उपदेशश्रोत्री सा वर्तते विदेहराजस्य जनकस्य पुत्री वैदेही रामायणस्य नायिका। द्वे अपि महत्यौ तपस्विन्यौ। अनेन वयं ज्ञातुं शक्नुमः अस्य संवादस्य कियत् महत्त्वमस्तीति।

अहमेवं चिन्तयामि यदि प्रत्येका स्त्री सीता-अनसूया-संवादं श्रद्धया मनसि धारयेत् सा स्व-गृहस्थजीवनमितोऽपि सुचारुरूपेण अग्रे नेतुं शक्नोति। तादृशः उपदेशः संवादेऽस्मिन् वर्णितः विद्यते।

स्वागतसत्कारानन्तरम् अनसूया मैथिलीमुपदिशति -

**त्यक्त्वा जातिजनं सीते मानवृद्धिं च मानिनि।**
**अवरुद्धं वने रामं दिष्ट्या त्वमनुगच्छति॥**

(वा. रा. अयोध्या. ११७, २२ श्लोकः)

अर्थात् हे सीते! बन्धुबान्धवान् त्यक्त्वा तेभ्यः प्राप्तायाः मानप्रतिष्ठायाः अपि त्यागं कृत्वा भवती रामस्यानुसरणं करोति, भवत्याः सौभाग्यमिदम्।

अस्य श्लोकस्याऽध्ययनेन ज्ञायते यत् शिथिला, वलिता, जरापाण्डुरमूर्धजा वृद्धा अनसूया कदाचित् एवं चिन्तयति, ''सीता तु कस्यचित् महाराजस्य पुत्री वर्तते। सा राजभवने एव वर्धिता, तस्याः विवाहोऽप्येकस्य नृपस्य गृहे, भाविनृपेण सहैव जातः। सा दुःखं किमिति न जानात्येव। इदानीं तस्याः पतिः चतुर्दशवर्षाणि यावत् वने एव वसिष्यति। कदाचित् पत्या सह वने परिभ्रमन्ती विविधदुःखान् सोढ्वा दुःखिता भूत्वा पतिविषये क्रोधं न प्रदर्शयेत्। यतो हि पतिविषयकः पत्न्याः क्रोधः तथा पत्नीविषयकः पत्युः क्रोधः एव गृहस्थाश्रमस्य महान् शत्रुः। अतः अस्मिन् श्लोके तपस्विनी अनसूया सीतायाः उत्साहवर्धनं कुर्वन्ती अस्ति इति दृश्यते।

अग्रे अनसूया वदति -

**नगरस्थो वनस्थो वा शुभो वा यदि वाऽशुभः।**
**यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः।**

**नातो विशिष्टं पश्यामि बान्धवं विमृशन्त्यहम्।**
**सर्वत्र योग्यं वैदेहि तपः कृतमिवाव्ययम्॥**
(वा. रा. अयोध्या. ११७, २३, २५ श्लोकौ)

अर्थात् पतिः नगरस्थः, वनस्थः, शुभः, अशुभः, ''धनैर्वा परिवर्जितः'' कथमपि वा भवतु परन्तु यासां स्त्रीणां भर्ता प्रियः भवति ताः लोके महीयन्ते।

द्वितीयः श्लोकः तु अत्त्युतमः अर्थात् हे विदेहराजनन्दिनि! विचारान्ते अहमेवं वच्मि यत् पतिं विहाय पत्न्याः न कोऽपि हितकरः बन्धुः वर्तते। पतिरेव स्वतपस्यायाः अविनाशिफल-मिवास्मिन् लोके परलोके च सर्वत्र सुखं प्रापयितुं समर्थः। एते चत्वारः श्लोकाः वस्तुतः सुखीगृहस्थजीवनस्थाधारस्तम्भः शास्त्रेषूच्यते ''न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते'' तथैव ''अर्धो वा एष आत्मनः यत्पत्नी''। कथनस्याभिप्रायः यत् स्त्री एव गृहस्थजीवनं चालयति।

अग्रिमाः त्रयः श्लोकाः तु अस्य संवादस्य फलश्रुतिरेव भाति।

**न त्वेवमनुगच्छन्ति गुणदोषमसत्स्त्रियः।**
**कामवक्तव्यहृदया भर्तृनाथाश्चरन्ति याः॥**
**प्राप्नुवन्त्ययशश्चैव धर्मभ्रंशं च मैथिलि।**
**अकार्यवशमापन्नाः स्त्रियो याः खलु तद्विधाः॥**
**तद्विधास्तु गुणैर्युक्ता दृष्टलोकपरावराः।**
**स्त्रियः स्वर्गे चरिष्यन्ति यथा पुण्यकृतस्तया॥**
(वा. रा. अयोध्या. ११७, २६, २८ श्लोकाः)

त्रयाणामपि श्लोकानामभिप्रायः एवमेवास्ति यत् यदि स्त्रियः गार्हस्थ्यजीवनमेवं प्रकारेण भवेत् ताः स्वर्गे चरिष्यन्ति इति।

अहमेवं चिन्तयामि यत् विवाहसमये नानाविधिभिः सह रामायणस्य सीता-अनसूया संवादोऽपि वधूवरयोः कृते श्राव्यते चेत् तयोः गृहस्थजीवनं सुखी, समृद्धं च भविष्यति एव। एवं निश्चयेन सुखिनः समाजस्य, सुखिनः राष्ट्रस्य निर्माणं वयं कर्तुं शक्नुमः।

विवाहः नाम केवलं स्त्रीपुरुषयोः मेलनमिति न अपितु तत्र विद्यते सुमधुरः, कोमलः विश्वासपूर्णः सम्बन्धः। मानसयोः आजीवनं सहभावस्य भावनया जीवनं यापयितु विवाहः क्रियते। अन्योन्याश्रयेण परस्परं भावयन्तः अग्रे नयतः संसारं तौ। संसरति गच्छतीति संसारः खलु। संसाररथमिदमग्रे नेतुमस्ति किलावश्यकता द्वयोरपि स्त्रीपुरुषचक्रयोः। तस्मात् परस्परा-वलम्बिभावनायाः बीजं विवाहेन उद्भिद्यते। अत एव तस्मिन् सन्दर्भे गार्हस्थ्यस्यादर्शविचारप्रकाशकं सीता-अनसूयासंवादं यदि जनाः शृणुयुः तर्हि तेषां मनस्सु परस्परानुरागयोः दृढा भावना निश्चयेन परिपूरिता भवेदिति मे आशयः। इति शम्।

● **डॉ. जयवन्त चौधरी**
क.का.सं.वि., रामटेक

**'न्याय्यात् पथः प्रविचलन्ति पदं न धीराः'**

## महत्त्वपूर्णप्रश्नाः।

केचन जनाः एवमपि सन्ति यत् अपराधिनः स्वजनाः सन्ति चेदपि ते दण्डार्हाः इति मन्यन्ते। एवमेव 'मनुनीतिचोळन्' नाम नृपः। एकदा तस्य पुत्रः नाम 'वीथिविडङ्गन्' रथं आरुह्य गच्छति स्म। तदा कश्चित् गोवत्सः रथस्य सम्मुखे आगतः। वीथिविडङ्गनस्य असावधानतया गोवत्सः मृतः।

इदं ज्ञात्वा राजा मनुनीतिचोळन् अत्यन्तं व्याकुलः अभवत्। सः सर्वान् मन्त्रिणः आहूय पृष्टवान् यत् - ''गोवत्सः व्यापादितः। अस्यां स्थित्यां को दण्डः दातव्यः घातकाय?''

सर्वे अगदन् - ''नीतिशास्त्रानुसारं घातकाय मृत्युदण्डनमेव दातव्यम्'' - इति।

(वल्ललार नाम तमिलसन्ता 'मनुमुरैकण्ड वाचकम्' नाम ग्रन्थे एतस्य उल्लेखनं कृतम्।)

अधुना राजा स्वगतं पृष्टवान् यत् -

''हे प्रभो! किं? मया कोऽपि वञ्चितः वा?
मया अनुचित रूपेण करः स्वीकृतः वा?
मया सभायां अनृतमुक्तं वा?
मया स्तेनस्य साहाय्यं कृतं वा?
मया आर्तस्य साहाय्यं तिरस्कृतं वा?
मया कस्यचित् परिवारस्य शान्तिभङ्गः कृतः वा?
मया स्त्रियः मानभङ्गः कृतः वा?
अहं गुरुं प्रति विनयभावं न प्रकटितवान् वा?
मया पण्डितानाम् अवमाननं कृतं वा?
मया प्रौढजनाः निन्दिताः वा?
मया पक्षिणः पिञ्जरे बन्धनं कृतं वा?
मया दूषित-खाद्यान्नस्य विक्रयणं कृतं वा?
मया जलपूरितः जलाशयः शुष्कः कृतः वा?
मया खगेभ्यः जीवेभ्यः छायाप्रदातारः वृक्षाः कर्तिताः वा?
मया जनानां वासस्थानानाम् अपहरणं कृतं वा?
मया मन्दिरस्य द्वारं पिहितं वा?
मया भक्तानां परिहासः कृतः वा?
मया मम पित्रोः उपदेशः तिरस्कृतः वा?
मया ईश्वरनिन्दनं कृतं वा?
मया किं पापं कृतं येन कारणेन मह्यं पुत्रवियोगः प्राप्तः?''
- एवं राजा प्रलापं करोति।

१) कथा वदति यत् तस्मिन् काले नीतिपरिपालनाय जनाः मुख्यत्वं ददति स्म।

२) कथा वदति यत् उपरिलिखितानां पापकार्याणां फलं कथं भवेत् - इति।

● **वसन्ताश्यामलम्**

संस्कृत-भाषा-प्रचारिण्याः सभायाः इदं साप्ताहिकं डॉ. चन्द्रगुप्त वर्णेकरः इत्यनेन सभायाः सचिवेन कृष्णचंद्र एजन्सीज, नागपुरम् इत्यत्र मुद्रापयित्वा संस्कृत-भवने २, पश्चिम-उच्च-न्यायालय-मार्ग, नागपुरे प्रकाशतां नीतम्।